रोल नं. | | | | | | | | |

मुदित पृष्ठों की संख्या : 6

105

405 (IAF)

# 2016

# संस्कृतम्

समय : 3 घण्टे ] [ पूर्णांक : 100

## खण्ड – 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए) –

भारतस्य उत्तरस्यां दिशि देवतात्मा हिमालयः विराजते। अयं पर्वत राजः हिमाद्रिः हिमवान् गिरिराजः नगपतिः नगाधिराजः इत्यादिभिः शब्दैः संबोध्यते। हिमालयो नाम नगाधिराजः अधित्यकायां त्रिविष्टप–नयपाल–भूटान नाम्नः पूर्णसत्तासम्पन्नान् राष्ट्रान् कश्मीर–हिमाचल–उत्तराखण्ड–झारखण्ड–असम–सिक्किम–मणिपुर प्रभृ तीन् प्रदेशान् प्रान्तरे बिभर्ति। हिमालयात् एव गंगा–सिन्धु–ब्रह्मपुत्राख्याः महानद्यः निस्सरन्ति। अस्य उपत्यकासु सघना वनराजयः विराजन्ते। अस्य वनभूमिषु जाताः सहस्रशः औषधयः जनान् स्वस्थान् कुर्वन्ति। हिमवतः नदीनां जलेभ्यः विद्युतः उत्पादनं विधीयते। दैनिक जीवने विद्युतन्महत्वं केन विस्मर्यते। मैग्नेसाइट–डोलोमाइट–ग्रेनाइट–फास्फोराइट–बेराइट–जिप्सम प्रभृतयः प्रचुराः खनिजपदार्थाः अत्र उपलभ्यन्ते। इत्थं परम्परया जीवनस्य आधारभूतस्य अस्य हिमालयस्य वयं सर्वे अधमर्णाः स्मः।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×4 = 2

(i) भारतस्य उत्तरस्यां दिशि कः पर्वतः विराजते ?

(ii) उत्तराखण्डराज्यं कस्मिन् पर्वते विद्यते ?

(iii) नदीनां जलेभ्यः कस्याः उत्पादनं विधीयते ?

(iv) हिमालयस्य वयं सर्वे के स्मः ?

(ख) संस्कृतस्य पूर्णवाक्येन उत्तरत (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए)– 1×2 = 2

(i) हिमालयात् काः महानद्यः निस्सरन्ति ?

(ii) औषधयः जनान् किं कुर्वन्ति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए)– 1×4 = 4

(i) 'सघना वनराजयः' अत्र विशेषणपदं किम् ?

(ii) देवतात्मा हिमालयः अत्र विशेष्य पदं किम् ?

(iii) 'प्रचुराः' अस्य विलोमपदं किम् ?

(iv) 'हिमालयः' अस्य पर्यायपदं लिखत ?

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिए) 2

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. भगिनी राष्ट्रस्य सीम्नि नियुक्तं स्वसैनिकं भ्रातरं रक्षासूत्रं पत्रे प्रेषयति। अधोलिखित पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां पूरयत– ½×10 = 5

(एक बहिन राष्ट्र की सीमा पर नियुक्त अपने सैनिक भाई को पत्र में राखी भेजती है। नीचे लिखे पत्र में रिक्त स्थानों को मञ्जूषा में दिए गए पदों की सहायता से पूरा कीजिए)

| |
|---|
| **मञ्जूषा –** परिजनाः, परमात्मनः, सेवायाम्, स्नेह पत्रे, स्वराष्ट्रम्, रात्रौ, अनुगृह्णातु, रक्षासूत्रम्, सैनिकानाम्, सुरक्षितम् |

(i) .....................

प्रिय भ्रातः !

सादरं वन्दनानि !

महोदय,

अत्र सर्वे (ii) ..................... कुशलिनः सन्ति। ते (iii) ..................... तव आयुष्यं कामयन्ते। अस्मिन् (iv) ..................... अहं तुभ्यं रक्षासूत्रं प्रेषयामि। आशासे (v) ..................... त्वं सततं प्राणप्रणेन रक्षिष्यसि। त्वादृशाणां (vi) ..................... संरक्षणात् एव राष्ट्रं (vii) ..................... भवति। देशवासिनः च (viii) ..................... सुखेन स्वपन्ति। अहं विश्वसिमि यत् तव हस्ते निबद्धम् एतत् (ix) ..................... त्वां राष्ट्ररक्षाव्रतं सदा स्मारयिष्यति।

सम्प्रति प्राप्तिं स्वीकृत्य (x) ..................... भवान्।

भवतः भगिनी

(क – ख – ग)

बजरंग एनक्लेव, बरेली

3. मञ्जूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत– ½×10 = 5

(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को भरकर उत्तरपुस्तिका में पुनः लिखिए)

कश्चन साधुः (i) ..................... वसति स्म। स एकाकी भूत्वा निर्जने स्थले (ii) ..................... तपस्याम् अकरोत्। तस्य एषा तपस्या ख्याता अभवत्। देवलोके देवानां मध्ये अपि (iii) ..................... प्रारब्धा। एतस्य श्रवणात् इन्द्रः चिन्ताकुलः (iv) .....................। तावता कश्चन देवः उत्थाय निवेदितवान्–'भगवन् ! तस्य तपस्यां विनष्टां कर्तुम् अहम् (v) ..................... करिष्यामि।' तदा देवः स्त्रीरूपेण आगत्य तस्मै फलम् अयच्छत्। साधुः तत् परमसुन्दरं रूपम् अवलोक्य (vi) ..................... अभूत्। एवं क्रमेण स्त्रीवेषधारी देवः नृत्येन (vii) ..................... च साधुं वशीकृतवान्। तपसि प्रवर्तने तस्य अनिच्छा (viii) .....................। एवं सः तपोभ्रष्टः (ix) .....................। अन्ते देवः साधोः भर्त्सनां कृत्वा–'प्रयत्नेन प्राप्ता तव तपश्शक्तिः (x) ..................... विनष्टा जाता। प्रयत्नेन पुनरपि तपः आचर। मोहवशगः च मा भूः' इति बोधयित्वा देवलोकं प्रतिगत्य इन्द्रं सर्वं कथितवान्।

| **मञ्जूषा –** अरण्ये, चर्चा, उपविश्य, अभवत्, विह्वलः, हासविलासेन, उपायम्, उत्पन्ना, जातः, मोहवशात् |
|---|

4. अधोलिखितेषु एकं विषयम् अधिकृत्य पञ्चवाक्यमितम् एकम् अनुच्छेदं संस्कृतेन लिखत– 1×5 = 5

(नीचे लिखे किसी एक विषय पर पाँच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए)

(i) उत्तराखण्ड राज्यम् (ii) रक्षाबन्धनम् (iii) सत्सङ्गतिः

## खण्ड – 'ग' (अनुप्रयुक्त–व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखांकित पदेषु सन्धि–विच्छेदं कुरुत– 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए)

(i) यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि।
(ii) जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम्।
(iii) तस्या येनाकार्य करिष्यति।
(iv) तदागच्छ दुर्गाध्यक्षसमीपे।
(v) मया भोजराजो रक्षित एवास्ति।
(vi) विनिर्मितं छादनमज्ञातायाः।

6. अधोलिखितेषु वाक्येषु रेखांकितपदानां विग्रहाः लेखनीयाः – 1×6 = 6

(नीचे लिखे वाक्यों में रेखांकित पदों का विग्रह कीजिए)

(i) वनगमननिवृत्तिः पार्थिवस्यैव तावन्।
(ii) सत्याय मितभाषिणाम्।
(iii) अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावि।
(iv) भवादृशानां प्रवेशसमयो भवति।
(v) विशेषतः सर्वविदां समाजे।
(vi) राजा भोजवधं ज्ञात्वा तं पृष्टवान्।

7. निम्नलिखितेषु वाक्येषु कोष्ठान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत– 1×8 = 8
(नीचे लिखे वाक्यों में कोष्ठक के अंतर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए)
(i) अनेन मणिना छन्दः ............... (प्र + नम् + ल्यप्) बहुशोनृपः।
(ii) युवतिरहितं लोकं ............... (कृ + तुमुन्) यतश्छलिता वयम्।
(iii) तदन्वये शुद्धिमति ............... (प्र + सू + क्त) शुद्धिमत्तरः।
(iv) ततः पुनर्निपुणं ............... (निर् + ईक्ष् + शानच्) दौवारिकः।
(v) राजभवनं ............... (गम् + क्त्वा) वत्सराजो राजानं प्राह।
(vi) वैराग्यमापन्नो वत्सराजः तं न ............... (हन् + क्तवतु)।
(vii) नीलेन पक्षनिबहेन खम् ............... (आ + हस् + शतृ)।
(viii) एकमेव रूपं कर्तुमात्मनः ............... (पूर्ण + तल्)।

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्– 1×5 = 5
(नीचे लिखे वाक्यों में कर्ता और क्रिया की अन्विति कीजिए)
(i) स्नेहत्यागान्न ...............। (शोच्यते / शोच्यसे)
(ii) मन्ये ............... च नृपतिर्गतः। (मोहः / मोहम्)
(iii) मनीषिणां माननीयो वैवस्वतो मनुर्नाम ...............। (आसीत् / आसन्)
(iv) तत् किं ............... न प्रविशति रात्रौ ? (केऽपि / कोऽपि)
(v) गुणी गुणं वेत्ति न वेत्ति ...............। (निर्गुणः / निर्गुणम्)

अथवा

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम्–
(नीचे लिखे वाक्यों में विशेष्य–विशेषण की अन्विति कीजिए)
(i) शुल्के विपणितं ............... पुत्रार्थेयदियाच्यते। (राज्यं, राज्ये)
(ii) क्रम प्राप्ते ............... राज्ये भुविशोच्यासने नृपे। (हृतं, हृते)
(iii) स पिता ............... तासां केवलं जन्म हेतवः। (पितरः, पितरि)
(iv) रूपं ............... न बुधास्तदाहुः। (प्रसिद्धः, प्रसिद्धं)
(v) नैकेनापि समं ............... वसुमती। (गता, गतं)

9. अधोलिखितेषु वाक्येषु कोष्ठान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्– 1×5 = 5
(नीचे लिखे वाक्यों में कोष्ठक में दिये गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके रिक्त स्थान भरिए)
(i) दीर्घप्रयासेन कृतं हि वस्तु ............... भजेद् विनाशम्। (निमेषमात्र)
(ii) सहोदरमपहाय राज्यं ............... प्रयच्छामि। (पुत्र)
(iii) ............... पक्षनिवहेन खमाहसन्तः। (नील)
(iv) नास्ति ............... आवश्यकता अवलम्बनस्य। (मत्कृत्)
(v) लक्ष्म्याः ............... पत्न्याः सहयोगः अनिवार्यः। (रक्षार्थ)

## खण्ड – 'घ' (पठितांश–अवबोधनम् भाग - I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

अथ दीपस्य समीपमागत्य संन्यासिनोक्तम् "दौवारिक ! न मां प्रत्यभिजानासि।" ततः पुनर्निपुणं निरीक्षमाणो दौवारिकस्तं पर्यचिनोत्–'आः ! कथं श्रीमान् गौरसिंहः ? आर्य ! क्षम्यतामनुचितव्यवहार एतस्य ग्राम्यवराकस्य। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत् – "दौवारिक ! मया दृढं परीक्षितोऽसि, यथायोग्य एव पदे नियुक्तोऽसि, त्वादृक्षा एव वस्तुतः पुरस्कार–भाजनानि भवन्ति, लोकद्वयं च विजयन्ते।"

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1
(i) संन्यासिरूपः कः आसीत् ?
(ii) दौवारिकः कं पर्यचिनोत् ?

(ख) पूर्णवाक्येन उत्तरत (पूर्ण वाक्य में उत्तर दीजिए) – 1

(i) दीपस्य समीपमागत्य संन्यासिना किम् उक्तम् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'दौवारिकस्तं पर्यचिनोत्' अत्र 'तम्' इति सर्वनामस्थाने संज्ञाप्रयोगः कर्त्तव्यः।

(ii) 'संन्यासिरूपो गौरसिंहः समवोचत्' अत्र 'समवोचत्' इति क्रियापदस्य कर्तृपदं लिखत।

(iii) 'कठोरम्' अस्य पर्यायवाचिपदं गद्यांशात् चित्वा लिखत।

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे नाट्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

ऋतध्वजः – अहो शोभनं गन्धर्वराजविश्वावसोः राजोद्यानम्। आम्रमञ्जरीणां परां शोभां दृष्ट्वा कोकिलानां च मधुरवचांसि श्रुत्वा कस्य यूनो हृदयं सहसा उत्कण्ठितं न भविष्यति ?
वामपार्श्वे रमणीनामालाप इव श्रूयते। अत्रैव स्थित्वा श्रोष्यामि।

कुण्डला – सखि मदालसे ! त्वं तु केवलं विद्याध्ययने एव रता कियन्तं कालं यावत् ब्रह्मचर्यव्रतं धारयिष्यसि ?

मदालसा – ज्ञानोदधिस्तु अनन्तपारो गभीरश्च। मया सागरतटे स्थित्वा कतिपयबिन्दव एव प्राप्ता अद्यावधि।

कुण्डला – विनयशीले ! विद्या ददाति विनयम् अत एव एवं भणसि। कुलगुरु–तुम्बरुमहाभागैस्तु गन्धर्वराजाय अन्यदेव सूचितम्।

मदालसा – किं श्रुतं त्वया यद् गुरुवर्यैः माम् अधिकृत्य पित्रे कथितम् ?

कुण्डला – अथ किम् राजकुमारी मदालसा सर्वविद्यानिष्णाता जाता परं तया स्वयं वरः न प्राप्तः अतः तस्यै योग्यवरस्य अन्वेषणं कार्यम् इत्यासीद् गुरुपादानां मतम्।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) गन्धर्वराजविश्वावसोः राजोद्यानं कीदृशम् ?

(ii) विद्या किं ददाति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए) – 1

(i) सर्वविद्यानिष्णाता का आसीत् ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'ज्ञानोदधिस्तु अनन्तपारः' अत्र किं विशेषणपदम् ?

(ii) 'सुन्दरम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(iii) 'श्रूयते' इति क्रियापदस्य किं कर्मपदम् ?

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत (नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए) –

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।।
अन्ये वापि युधिष्ठिरप्रभृतयो याता दिवं भूपते !
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति ।।

(क) एकपदेन उत्तरत (एक पद में उत्तर दीजिए) – ½×2 = 1

(i) कृतयुगालङ्कारभूतो महीपतिः कः ?

(ii) महौदधौ सेतुः केन विरचितः ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए) – 1

(i) युधिष्ठिर प्रभृतयः राजानः क्व याता ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) – 1×3 = 3

(i) 'वसुमती' अस्य क्रियापदं किम् ?

(ii) 'मान्धाता महीपतिः' अत्र विशेषणपदं किम् ?

(iii) 'यास्यति' अस्य कर्तृपदं किम् ?

13. निर्देशानुसारं प्रश्नान् उत्तरत (निर्देशानुसार प्रश्नों के उत्तर दीजिए) –

(क) शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।
कस्य स्वजनशब्दो मे लज्जामुत्पादयिष्यति ।।

(i) इमं श्लोकं कः कं प्रति कथयति ? 1+1 = 2

(ख) शोकादवचनाद् राज्ञा हस्तेनैव विसर्जितः ।
किमप्यभिमतं मन्ये मोहं च नृपतिर्गतः ।।

(i) अयं श्लोकः कस्मात् ग्रन्थात् संकलितः ? (ii) अस्य ग्रन्थस्य लेखकः कः ? 1+1 = 2

14. अधोप्रदत्त भावार्थत्रये शुद्ध भावार्थस्य चयनं कृत्वा लिखत– 2+2 = 4
(नीचे लिखे गये क, ख खण्डों में प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए)

(क) न त्वं शोचितुमर्हसि।

**भावार्थ–** (i) त्वं शोकं कर्तुं योग्यः न असि। (ii) न त्वं शोकं मोहं वा कर्तुमर्हसि।
(iii) त्वं सदा शोचितुमर्हसि।

(ख) नैकेनापि समं गता वसुमती।

**भावार्थ–** (i) इयं वसुधा एकेनापि समं न गतवती। (ii) इयं वसुधा केनापि समं न गतवती।
(iii) इयं वसुधा एकेन समं गतवती।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तभावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत– ½×8 = 4
(नीचे दिये गये श्लोक के भावार्थ को मंजूषा में दिये गये पदों से पूर्ण करके लिखिए)

जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम्।
न खलु स्वर्गतर्षेण नास्नेहेन न मन्युना ।।

**भावार्थ–** अहं न तु (i) ................ प्राप्तेः (ii) ................ न हि (iii) ................ द्वेषभावनयानवा (iv) ................ यातोऽस्मि; (v) ............ अहं (vi) ............ मृत्योश्च (vii) ............ तपसः अरण्यं (viii) ............... ।

| **मञ्जूषा** – स्वर्ग, इच्छया, क्रोधेन, कयापि, अपितु, विनाशार्थमेव, प्रविशामि, जरायाः |
|---|

15. अधोलिखित श्लोक द्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत–
(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए)

(क) रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ।। ½×4 = 2

**अन्वयः–** (अहं) तनुवाक् (i) ................ सन् अपि (ii) ................ कर्णम् आगत्य (iii) ................ प्रचोदितः (iv) ................ अन्वयं वक्ष्ये।

(ख) प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।। ½×4 = 2

**अन्वयः–** प्रजानां (i) ................ एव सः (ii) ................ बलिम् अग्रहीत्। (iii) ................ सहस्रगुणम् उत्स्रष्टुम् हि (iv) ................ आदत्ते।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत– 1×4 = 4
(निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिए)

| स्तम्भ 'अ' | स्तम्भ 'ब' |
|---|---|
| (क) वनगमननिवृत्तिः | (i) धनुः स्पृश मा दयां। |
| (ख) यदि न सहसे राज्ञो मोहं | (ii) राज्ये मे न मनोरथः। |
| (ग) क्रम प्राप्ते हृते राज्ये | (iii) पार्थिवस्यैव तावन्। |
| (घ) यत्कृते महति क्लेशे | (iv) भुवि शोच्यासन्ने नृपे। |


[ P.T.O.

17. अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रसंगानुसारम् उचितार्थ कोष्ठकात् चित्वा लिखत– $1 \times 4 = 4$
(अधोलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचितार्थ कोष्ठकों से चुनकर लिखिए)

(क) रूपं प्रसिद्धं न बुधा स्तदाहुः। (विद्वांसः, अल्पज्ञाः, मूर्खाः)

(ख) न दुर्जनः सज्जनतामुपैति। (पिशुनः, दुष्टः, साधुः)

(ग) सर्वस्य लोचनं शास्त्रम्। (नेत्रम्, दृश्यम्, दिशा)

(घ) पिको वसन्तस्य गुणं न वायसः। (चैत्रस्य, ग्रीष्मस्य, शीतस्य)

## खण्ड – 'घ' (संस्कृत साहित्य परिचयः भाग - II)

18. अधोलिखितानां कवीनां देशकाल कृतीनां यथानिर्देशं नामानि लिखत–
(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए)

(क) कवयः $1 \times 3 = 3$

(i) अम्बिकादत्त व्यासः
(ii) कालिदासः
(iii) वेद कुमारी घई
] देशः

(ख) कवयः $1 \times 3 = 3$

(i) अश्वघोषः
(ii) पण्डिता क्षमारावः
(iii) भासः
] कालः

(ग) कवयः $1 \times 4 = 4$

(i) भर्तृहरिः
(ii) बल्लालसेनः
(iii) ईशदत्त शास्त्री
(iv) श्री गोविन्दचन्द्र उद्‌गाता
] काऽपि एका रचना

**अथवा**

(क) निम्नांकित वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्तस्थानपूर्तिः क्रियताम्– $1 \times 5 = 5$
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थान की पूर्ति कीजिए)

(i) लोकोत्तरानन्ददाता .................. काव्यनामभाक् भवति। (प्रबन्धः, मुक्तकः, प्रकीर्णः)
(ii) .................. गद्यकाव्येषु गण्यते। (रूपकं, कथा, खण्डकाव्यम्)
(iii) ................ श्रव्यं निरूप्यते। (गद्यकाव्यं, नाटकं, पद्यकाव्यम्)
(iv) दृश्यं श्रव्यमिति .................. काव्यं भवति। (द्विधा, त्रिविधं, एकधा)
(v) महाभारतस्य रचयिता ................ अस्ति। (कालिदासः, व्यासः, भासः)

(ख) संस्कृत महाकाव्यानां पञ्चविशेषता लिखत। 5
(संस्कृत महाकाव्यों की पाँच विशेषताएँ लिखिए)

********